६प्रकाशान्विते त्रि०” काशेरिदम् तस्यां भवं वा काश्या० ष्ठञ् ञिठ् वा । काशिक काशिसम्बन्धिनि तत्रभवे च त्रि० ञिऽङ्गत् उच्चारणार्थः स्त्रियां ष्ठञि ङीष् ञिठि टाप् । साच वा मनक्तायां पाणिनिष्ठक्तौ स्वार्थे क । काशिका काशीपुर्य्यां स्त्री ।

**काशिन्** त्रि०काशते काश+णिनि । १प्रकाशशीले । जयकाशी स्त्रियां ङीप् मत्तकाशिनी काश+इनि ।२काशरोगयुक्ते त्रि०

**काशिप** पु० काशीन् देशान् तत्स्थपुरीं वा पाति पा—क १ काशिदेशाधिपे दिवोदासादौ काशीनाथे २ महादेवे च काशिनाथादयोऽप्यत्र । “सुवर्णवर्म्माणसमेत्य काशिपं वपुष्टमार्थे वरयांप्रचक्रिरे”

**काशिपुरी** स्त्री काशीदेशे पुरी कर्म्म० वा । काश्याम् स्वनामख्यातपुरीभेदे । “समेतं पार्थिवं चत्रं काशिपुर्य्यां स्वयंवरे”भा०आनु० १६८अ० । काशिनगर्य्यादयोऽप्यत्र स्त्री

**काशिराज** पु० काशीनां जनपदानां राजा टच्समा० । काशिदेशाधिपे । तद्देशाधिपाश्च कालभेदेन यद्यपि बहवस्तथापि काशिनामकन्टपेण तदन्वयेन तत्र काशीपुरीकरणात् तदन्वयजस्यैव तदधिपत्यं प्रथितं तदेतत् हरिवं २२अ० वर्णितं यथा

“काशेस्तु काशयोराजन् पुत्रो दीर्घतपास्तथा । बभूव दीर्घतपसो विद्वान् धन्वन्तरिः सुतः । धन्वन्तरेस्तु तनयः केतुमानिति विश्रुतः । अथ केतुमतः पुत्रो विद्वान् भीमरथः स्मृतः । दिवोदास इति ख्यातः सर्वरक्षः प्रणाशनः। एतस्मिन्नेव काले तु पुरीं वाराणसीं न्टपः । शून्यां निवेशयामास क्षेमको नाम राक्षसः । शप्ताहि सा मतिमता निकुम्भेन महात्मना । शून्या वर्षसहस्रं वै भवत्विति नराधिप ! । तस्मान्तु शप्तमात्रायां दिवोदासः प्रजेश्वरः । विषयान्ते पुरीं रम्यां गोमत्यां संन्यवेशयत् । भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनाम् । हत्वा निवेशयामास दिवोदासः प्रजेश्वरः । दिवोदासस्य पुत्रस्तु वीरो राजा प्रतर्द्दनः । प्रतर्द्दनस्य पुत्रौ द्वौ वत्सो भार्गव एव च। अलर्को राजपुत्रस्तु राजा सन्नतिमान् भुवि । हैहयस्य तु दायाद्यं हृतवान् वै महीपतिः । आजह्रे पितृदायाद्यं दिवोदासहृतं बलात् । भद्रश्रेण्यस्य पुत्रेण दुर्द्दमेन महात्मना । दिवोदासेन बालेति घृणया स विसर्ज्जितः। अष्टारथो नाम न्टपः सुतो भीमरथस्य वै । तेन पुत्रेषु बालेषु प्रहृतं तस्य भारत । वैरस्यान्तं महाराज ! क्षत्रियेण विधित्सता । अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसङ्गरः । षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च । तस्यासीत्सुमहद्राज्यं रूपयौवनशालिनः । युवा रूपेण सम्पन्न आसीत् काशिकुलोद्वहः । लोपामुद्राप्रसादेन परमायुरवाप सः । वयसोऽन्ते महाबाहुर्हत्वा क्षेमकराक्षसम् । रम्यां निवेशयामास पुरीं वाराणसीं न्टपः”।

तत्रापि दिवोदासस्यैव तथात्वम् सर्वत्र प्रथितं सहि देवान् पृथिव्या निष्काश्य वाराणस्यां राज्यं चकारेति काशीख०४३अ० वर्णितं यथा “गतेषु देवसंघेषु पृथिव्याः पृथिवीपतिः । चकार राज्यं निर्द्वन्द्वं दिवोदासः प्रतापवान् । विधाय राजधानीं स वाराणस्यां सुनिश्चलाम्”। इत्युपक्रम्य तद्राज्यं वर्णितम्“दिवोदासस्य तस्यैवं काश्यां राज्यं प्रशासतः। यातमेकदिनप्रायं शरदामयुताष्टकमिति” तत्र तस्य बहुकालराज्यकरणात् तथात्वम् “काशिराजं दिवोदासम्” सुश्रु० । “द्वापरे तु दीर्घजिह्वासुरांश न्टपभेद स्तन्नाम्ना प्रसिद्धः “दीर्घजिह्वस्तु कौरव्य ! य उक्तो दानवर्षभः । काशिराजः स विख्यातः पृथिव्यां पृथिवीपतिः” भा०आ०६७अ० । तस्यासुरांशभवत्वात् विष्णुं प्रति द्वेषो यथा हरिवं०६१अ० । “कौशल्यः काशिराजश्च दशार्णाधिपतिस्तथा” इत्युपक्रम्य“तमन्वयुर्जरासन्धं विद्धि-पन्तोजनार्द्दनम्” इत्युक्तम् । स च अम्बिकादीनां पिता । “विचित्रवीर्य्योऽथोवाह काशिराजसुते क्रमात्। स्वयंवराडुपानीते ह्यम्बिकाम्बालिके उभे” भाग० ६,२२, १८। स च नाम्ना काशिराजत्वेऽपि काशिपतिरासीत् ।

“अथ काशिपतेर्भीष्मः कन्यास्तिस्रोऽप्सरोपमाः । शुश्राव सहिता राजन् दृणाना वै स्वयंवरम्” भा० आ० १०२अ० । “एवमुक्त्वा महीपालान् काशिराजश्च वीर्य्यवान्” तत्रैवोक्तेः “धृष्टकेतुश्चेकितानः काशिराजश्च वीर्य्यवान्” गीता । काशिपत्यादयोऽप्यत्र ।

**काशिष्णु** त्रि० काश—बा० इष्णुच् । प्रकाशशीले । “काशिष्णुना कनकवर्णविभूषणेन” भाग० ४,२०,६,

**काशी** स्त्री काशते काश—इन् स्त्रियां ङीप् । काश—णिच्—अच् गौरा० ङीष् । असिवरुणयोर्मध्यवर्त्तिन्यां स्वनामख्यातायां शिवपुर्य्याम् । तन्निरुक्त्यादि काशीख० । “निर्व्वाणकाशनाद्यत्र काशीति प्रथिता पुरी । अविमुक्तो महाक्षेत्रे न मुक्तो शम्भुना कचित् । प्रागेव हि मुनेऽनर्घ्यं जातं जाम्बुनदं स्वयम् । पुनः स्वर्धुनितोयेन हीरेण यदि सङ्गतम् । चक्रपुष्करिणीतीर्थं प्रागेव श्रेयसांपदम् । ततः श्रेष्ठतरं शम्भोर्मणिश्रवणभूषणात् । आनन्दकानने तस्मिन्नविमुक्ते शिवा-